International Journal of Education and Science Research Review
IJESRR
E-ISSN 2348-6457
Volume-2, Issue-6 January- 2016
P-ISSN 2349-1817
www.ijesrr.org
Email- editor@ijesrr.org

# ऋग्वेदसूक्तयः तासां विमर्शः

**पं. रामदेवदीक्षितः**

व्याख्याता – यजुर्वेद

राजकीय महाराणा आचार्य संस्कृत महाविद्यालय, उदयपुर

- **सनः पितेव सूनवेऽग्रे सूपायनो भव। सचस्वानः स्वस्तये॥ ऋग्वेद १–१–६**

**विमर्शः –** मध्येमन्त्रमग्रेः सम्बोधनेनेहाग्रेरखिलं रूपमधिगम्य ऋषिणाभ्यधायि। अग्रेर्नानात्वं जगद्व्यापि। पञ्चाग्रेस्तापस्य प्रसिद्धिः शास्त्रैरप्युदीरितात्तत्राद्याग्रिरिह वैश्वानरो विम्रष्टव्यः। परमात्मपुरुषोऽधिगीतमुरुं गायन्नाह –

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**

**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥**

प्राणिनां देहमाश्रितोग्रिरेवापरनाम्रा वैश्वानरः समुदीर्यते। सैव जठराग्रिरिह श्लोकेऽधिगीतः। अहं चतुर्विधमन्नं पचामीत्युक्तेहाधिकलेवरं राजमानः देहपोषकः हृदिस्थोऽगुंष्ठमात्रः पुरुषोऽधिग्रहीतव्यः –

**"स एवाविता लोके जनानामनिशं जवः।**

**बहिरन्तञ्च नाऽसंगः ख इवानुप्रपालकः॥"** इति झोपाह्वमैथिलः।

असावग्निः सूत्थः सर्वं पुष्णाति। सुप्तः सन्नस्वस्थं विधत्ते। अतोऽग्रे! त्वं सूपायनो भव इत्युक्तः। सूपायनेनेह सुपाचको भवेत्यर्थस्स्वीकर्त्तव्यः। कथमिति पृष्टेऽत्राह पितेव सूनवे यथा जनकः सूनुं परिपुष्णाति। नः अस्मानिति यावत्। पिता सूनुं सर्वथा सुखयति। देहमाश्रितोऽग्रिर्वैश्वानरस्तथैवास्मद्देहमवत्विति। कलेवरमाश्रित्याधिष्ठितानल एव जीवनाधायकत्वेन व्यवस्थितः। सैव जीवं पुष्णाति। अन्नमयशरीरस्यान्नं जीवनन्तद्धि चतुर्विधमिति गीतायामुक्तं कृष्णेन तद्यथा भोज्यं भक्ष्यं चोष्यं लेह्यञ्चेति एतद्धि प्राणापानसमायुक्तं सत् जठरे तिष्ठति तत्पचति च। क्वापि यन्त्रेऽनिलस्यानिवार्य्यम्। मरुत्तरयन्त्रेऽपि व्यजनयन्त्रसहायकेन तैलं वाहनमग्रे समीरयति। तथैव पाचनतन्त्रेऽपि प्राणापाननामके वायू अपेक्षितव्यौ। अतः समुक्तं प्राणापानसमायुक्तं पचाम्यन्नं चतुर्विधमिति। **"पहला सुख निरोगी काया, "शरीरमाद्यं खलु धर्मसाधनम्" "साधनधाम मोक्षकर द्वारा" "सबके देह परमप्रिय स्वामी" "आत्मानं सततं रक्षेद्दारैरपि धनैरपि"** इत्यादिवचनानां सार्थकत्वन्तदैव

International Journal of Education and Science Research Review
Volume-2, Issue-6 January- 2016 E-ISSN 2348-6457 P-ISSN 2349-1817
www.ijesrr.org Email- editor@ijesrr.org

सम्भवं यदा स्वास्थ्यस्य स्वस्तित्वं स्यादतोऽत्र ऋषिः मन्त्रे **"स्वस्तये"** इति पदोपादानं चकार। अनलाभावो हि मृत्युः। तस्य सत्तैव जीवनमिति प्रत्यक्षगोचरम्। मृत्युमधिगतस्य शरीरस्य नाडीचलनं परीक्ष्यते। सत्यग्नौ सा चलति। अभावमापन्ने सति न चलति। सामान्योऽपि नाडीं परीक्ष्य जीवनं मरणमवगच्छति तत्र कारणमग्निरेवातस्सर्वविध–कल्याणायाग्निः प्रार्थ्यते, स्वस्तये कामना च क्रियते। ऋग्वेदस्याद्याग्निसूक्तोक्तं **"पितेव सूनवे"** इत्यत्रोपमां संलक्ष्य वक्तुमुचितं यदस्या एव ऋच उपमालंकारावतारः। नात्रोत्पेक्षालंकारः इवपदोपादानादपि। **"साधर्म्यमुपमा भेदः"** इत्युक्तदिशोपमाया भेदप्रसंगात्। यद्यप्यत्रोदीरितानलः कथंजातीयक उपादेय इति स्पष्टन्नास्ति तथापि स्वस्तिपदवचनादुक्तोऽनलोऽधिकां प्रासंगिकतां भजते। मनूक्तमनुस्मृतावेकत्र **"अगारदाही"**ति उल्लेखोऽपि संकेतयते यत् अगाराणामधिकत्वेन दग्धानां भयानकत्वमभिलक्ष्यापि सहजत्वेनास्यामुच्चार्यते यद्धे भगवन्! पाहयनलादमुष्मात्। इत्यद्भुतं बीभत्सं दृश्यमदर्शनीयं संदृश्य ऋषिणा साधूक्तं सूक्तेऽमुष्मिन् **"स नः पितेव सूनवेऽग्ने सूपायनो भव।"**

समस्तोर्जाया प्रसविता सवितैव। सोऽपि कालपदव्यदिष्टः कृष्ण एव। स एव नानोपाधिभिर्नानानाम्नाभिद्यो सन्निहाग्निरिति समुक्तः। वासुदेवस्तु **"अहं वैश्वानरो भूत्वा"** इत्युवाच। एकत्र गीताया सैव वसुदेवनन्दनस्समुवाच तद्यथा **"कालोऽस्मि लोकक्षयकृत्प्रबृद्धः"** **"लेलिह्यसे ग्रसमानः समन्तादि"** व्यप्यपरं प्रमाणम्। शरीरमाश्रितः कालोऽग्निरेव शारीरं स्वास्थ्यं विद्यते। अतः अत्रावस्थितोऽग्निरूपः कालरूपश्च वासुदेवः समुपासनीयः। यस्मिन्नुपासिते सर्वमुपासितं स्यात्। अयमेव क्षेत्रज्ञः सर्वथा समुपासितव्यः क्षेत्रं यो जानाति सैव क्षेत्रं परिपोषयति। क्षेत्रज्ञः जीवात्मोपाधियुक्तोऽनुपाधिवन्तं परमात्मानं प्राप्तुमर्हः। एवमैहिकमामुत्रिकमपि मंगलं क्षेत्रज्ञः समुपलभत इति।

**वातं पित्तमयं नित्यं श्लेमाणं देहमाश्रितम्।**

**समन्वेति च पुष्णाति पुरुषोऽन्नमयं भुवि॥**

**इत्युक्तं रामनारायण झोपाख्यपद्यमिह ध्यातव्यम् ॥**

- **"इन्द्रं वधन्तो अप्तुरः कृण्वन्तो विश्वमार्यम्। अपघ्नन्तो अराष्णः" ऋग्वेदः– ६–६३–५**

**विमर्शः –** इन्द्रमात्मानं वर्धन्तो वर्धयन्तः अप्तुरः प्राप्नुवन्तः विश्वमखिलसंसारम् आर्यं श्रेष्ठं कृण्वन्तो कुर्वन्तः। अपघ्नन्तः अपाकुर्वन्तः अराष्णः अंहस इति पदार्थः। अत्रोक्तं सूक्तं **"कृण्वन्तो विश्वमार्यम्"** इति पदम्। व्युत्पत्तिलभ्यमर्थमार्यस्योपादाय किंचिदुच्यते। **"अर्तुमर्हो योग्यमिति वेति विगृह्य"** **"ऋ गतौ"**

इति धातोः **''ऋहलोर्ण्यत्''** इति अर्हेऽर्थेण्यति **''अचोऽञ्णिति''** इति ऋकारस्य वृद्धौ सत्यां **''उरण रपरः''** इत्यनेन पाणिनीयेन रपरत्वे च सुविहिते **''आ्र्+य''** आर्यमिति भवति। आर्यं गम्यमिति स्यात्। अत्रेदं ध्यातव्यं यत् गम्यं किमिति प्रश्नः कुत्रेति प्रश्नः। यद्धि सुस्थलं तत्रेति यावत्। गम्या अगम्येति शब्दो बहुधा शास्त्रेषु योषिताया कृते समुच्चार्यते। या हि विवाहिता सा गम्या, या हि विवाहेतरा परा सा अगम्येति, अर्थात् समाजसम्मुखे पाणी प्रगृह्य या समानीता सैव गम्या नान्या अनेन व्यक्तं भवति गम्यः श्रेष्ठः। कतिचिच्छब्धा परिभाष्यार्थं परिगृह्योच्चारणीयाः। शब्दो वाच्यार्थं विहाय परिभाष्यार्थं गच्छति तथैवेहापि परिभाष्यार्थं संगृह्य श्रेष्ठार्थोऽपि ग्रहणीय एव। साहित्यग्रन्थेषु शतशः श्रेष्ठवाचिनमार्यं सम्बोध्य प्रयुक्तो दृश्यते। शाकुन्तले शकुन्तला दुष्यन्तं सम्बोध्य आर्य! इति बहुधा समुक्तवतीति निदर्शनमात्रम्। **''ऋषिः मन्त्रद्रष्टा आप्तवक्ता भवति।''** यो हि आप्तः स यथार्थवक्त्ता, यो यथार्थं वक्ति स यदि आर्यपदं प्रयुनक्ति तर्हि तत्रार्थोऽपि सम्यगर्थे एव स्यादतः ऋषिभिरुक्तमार्यं श्रेष्ठार्थे एव प्रयुंजीतेति मामकं मतं तत्र डॉ रामनाराणझा प्रयुक्तं पद्यमिह समुद्धरामि।

**अनंहाः अनघोऽपापोऽवृजिनोऽदोषदृग्जनः।**

**शुद्धात्मा सुमनाश्चार्यो ह्यनसूयुरन्दिकः॥**

सुचिन्तकैरस्माकमृषिभिः विश्वस्मै सुभावना सुकल्पिता। स्वार्थं विसृज्य सर्वेषां मंगलाय न केवलं कल्पना कृता अपितु कार्यमपि विहितम्। अस्य सूक्तस्यानुवादः पश्चाद्वर्तिना कविना एवं कृतः –

**अयं निजः परोवेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैवं कुटुम्बकम् ॥**

अत्र पद्ये वसुधैव कुटुम्बकमिति पद्यं **''कृण्वन्तो विश्वमार्यम्''** इति अनुकुरुते। एवमेव भावनामात्सात्कृत्य पद्यमेकं विश्वस्मै रोचमानमस्माभिर्भारतवंशिभिरेवं नित्यं सुगीयते–

**''सर्वे भवन्तु सुखिनः,**

**सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु,**

**मा कश्चिद् दुःखभाग्भवेत् ॥''**

अस्माकं परम्परायामेकोक्तिः सूच्चार्यते **"गोत्रं नो वर्धताम्"** एनां सूक्तिमाश्रित्य ऋषयो हि स्वेषां गोत्राणां वर्धापनाय उद्घोषणां चक्रे वेदवाक्यमाध्यमेन तद्यथा –

**"कृण्वन्तो विश्वमार्यम्।"**

कस्तावत् कांक्षति यद्दुरितमस्तात् सुदूरं स्यात्सुकृतमस्माकं नेदिष्ठं स्यात् मन्ये सर्वे समिच्छन्ति। रामायणे तुलसीदासेन सूक्तं यथा –

**"जाकी रही भावना जैसी,**

**प्रभु मूरति देखी तिन जैसी॥"**

ऋषीणां संकल्पनामार्यभावनां प्रसारयन्ती संल्लक्ष्यते। यथा यो स्यात् तथा कर्तुं स प्रयतते। अयं ब्रह्मदेवाः तत्रत्यः ऋषिगणः सर्वं ब्राह्मणं निर्माय आर्यसंस्कृतिं समीप्सतिस्म। ब्रह्मसंस्कृतिरेवार्यसंस्कृतिः। अमुष्मादिभन्ना संस्कृतिः राक्षसी संस्कृतिः। ब्रह्मसंस्कृतिरेव दैवीसम्पदा समुक्ता, यथा – गीता

**१६–१ अभयं सत्त्वसंशुद्धिर्ज्ञानयोग व्यवस्थितिः।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥**

**१६–२ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**

**दया भूतेष्वलोलुप्त्वं मार्दवं हीरचापलम् ॥२॥**

**१६–३ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**

**भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥**

अस्माकमृषीणामयं महान् प्रयत्नो येन सर्वत्र शान्तिः, करुणा, मुदिता, सत्यता, स्युः। दैवीसम्पदमंगीकृत्य मानवा आर्यस्थानीया भवितुमर्हाः। आर्यो हि समाजं राष्ट्रं सम्यक् रक्षितुमर्हेत। अनार्यस्तु सर्वथा राष्ट्रं विकर्तुमेव चेष्टते। अतः आर्यानार्ययोरन्तरं परिचीयार्यपथमनुगन्तुमस्माभिस्सततं यतनीयम्। ऋषिभिरुक्तं मन्त्रं हृदये निहाय विश्वस्मिन् वयं गुरुस्थानीयास्तदा भवेमेति।

- **त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदधम्। १/९७/६**

**विमर्शः –** विश्वतोमुख इति सम्बोध्य ऋषिणा परमात्मेव व्याख्यातः। एतद्धि सम्बोधनपदम्। विश्वं व्यापकत्वं व्याचष्टे, अतो विश्वपदेन सर्वं व्याप्य स्थितं यत्तद्धि विज्ञातं भवति। भारत्यां विश्वस्मात् तसिप्रत्ययो तेन सर्वतोवत् विश्वतो भवति सर्वतः पर्यायवचनोऽयं शब्दः भाषायां वेदे च प्रसिद्ध सैवेह द्रष्टव्यः। विश्वतो मुखं यस्येति बहुब्रीहिणायं कश्चित्पुरुषोऽवगन्तव्यः। इह तु चतुर्षु दिक्षुं व्याप्तः परमात्मैव ग्रहीतव्यः। ऋषिः व्यापकमीश्वरमधिगृह्य युष्मदत्वमिति प्रोच्यात्मीयत्वं प्रदर्श्य स्वाभिप्रायं प्रकटयन्निवेदयति। त्वमसि इत्यनेन प्रश्नः? किमसि इति? तर्हि व्याजहार विश्वतः परिभूरिति। अर्थात् हे परमात्मन् त्वं प्रतिकणमभिव्याप्य सर्वद्रष्टा सर्वान्तर्यामी सर्वाध्यक्षः सर्वविश्वास–भूमिः। **''सर्वं खल्विदं ब्रह्म''** इत्युपनिषदोक्तं वाक्यं सत्यापयसि। ऋषेरत्राभिमाननिरसनपुरस्सरं विश्वात्मानं प्रति अनन्यार्पणं दृश्यते। पूर्णतः समर्पणेनैवेश्वरस्तमुपकुरुत इति भावो भक्तिमार्गे प्रतिद्धस्तस्य लोकार्पणमिह–

**''अनन्येनैव योगेन मां ध्यायन्त उपासते।''**

रामायणेऽनपायिनी भक्तिरियं प्रोक्तेति –

**''सन्मुख होई भक्त मोई जब हि।**

**जन्म कोटि अघ नाशहि तबहि॥''**

रामायणे निगदितां द्वितीयां पंक्तिमवलम्ब्य वक्तुं शक्यमिहेत्यस्य वेदोक्तद्वितीयवाक्य स्याभिप्रायं तद्यथा –

**''अप नः शोसुचदधम्''**

अघमिति दुष्कर्म पापम्वा तद्धि नोऽस्माकं अपशोसुचत् दूरीकृरुत इति यावत्।

शास्त्रेषु पापपर्यायवचनस्याघस्य बहुकृत्वः प्रयोगदर्शनादपि क्वचित्क्वचिदिदमपि दृष्टिपथमावर्जयति यदद्यं रोगमाह। अघमेव रोगो भूत्वा यथाकालं प्रकटीभवति **''परोपकरारः पुण्याय पापाय परपीडनम्''** इति व्यासोक्तपुण्यपापार्थादतिरिच्याप्यन्योऽर्थः मनसि स्वं प्रति प्रत्यर्पयति। हिरण्यकशिपूस्तु रुजमर्थमेवं भागवते प्रवदति। वेदेष्वपि विमृष्टे सति अयमेवार्थो गरीयान् भूत्वाक्षिपथमवतरति। स एव परमात्मा भवरोगमपवारयितुमर्हः। लोकेषु भगवानिति प्रतिलोकमुखवचनो हि चिकित्सकः आयुषि सति एव नैरुज्यं विधातुमर्हः। परमात्मप्रदत्त–पञ्चवायून साधून् कर्तुं किञ्चिदधीत्यारोग्यशास्त्रं रोगानपवार्यानुच्यते भगवानिति इतोऽपि अधिके विचारे ज्ञातुं शक्यं यद्भागवते तु –

**''भगवान् भगवत्तरः''** इत्युक्त आधुनिको वैद्यचिकित्सको रोगापवारकोऽद्यतनचिकित्साचिकित्सकडाक्टरस्तत्रापि परमात्मैवागत्य तत्रान्तोऽन्तर्झायी भूत्वा लोकरुजमपाकृत्यायूंषि दातुमुत्सुको भवति। अतः परमात्मैव परमचिकित्सकः सर्वेषां पशुपक्षिकीटपतंगदानवमानवादीनां नानाविधरोगानपकुरुते। सैवौषधिर्भूत्वा मूलेषु निवसति।

**''परमात्मैव चिकित्सा स्याच्चौषधिर्वैद्य एव च॥''**

यथा गीता –

**'पुष्णामि औषधीः सर्वाः सोमो भूत्वा रसात्मकः।'**

अतो वेद भगवानाह **''शोसुचदधम्''** इति। अद्यतनायुर्दातापि अनिशमीश्वरमेव निदिध्यायते यन्मया कृतं निदानं सफलीस्यादिदिति। अर्थात् सफलकस्तु परमात्मैवातः सर्वैरपि परमात्मैव निदिध्यासितव्यः, मन्तव्यः, उपासितव्यः, द्रष्टव्यः, श्रोतव्यः। अनन्योपासनापद्धतिरियमेव। अस्यां पद्धत्यामवलोककस्तु भगवानेव। मनुष्यस्तु मायाकृतमभिमानमात्मनि संस्थाप्यात्मानमेव सर्वं मन्तुं मिथ्याहंकारे निमज्जनुच्चावचपथ बाभ्रमीति तत्तुच्छमेव। व्यतीतायां युवावस्थायां सर्वः सम्यक्तयात्मानमवगच्छति। अवगमोऽयं शाश्वतिकः कल्याणं कुरुत इति। अहंकारं विसृज्य शुद्धान्तः करणः सन् मानवीय धर्ममुररीकृत्य कार्यं कुर्वन्नरः ईश्वरस्य नेदिष्ठो भवति तुलसीदासश्चाह –

**''निर्मल मन जन सो मोहि पावा।**

**मोहि कपट छल छिद्र न भावा॥''**

तुलसीदासस्यायं वेदमन्त्रवल्लौकिक मन्त्रोऽद्यतनान् दिशति सुपन्थामग्रेऽपि युगाब्दं यावत् मार्गं प्रदर्शयिष्यति इति मम द्रढीयान् विश्वासः। लौकिकमन्त्रमेनम् आत्मनि अवश्यमेव निदिध्यायेत। निरुक्तस्य वचनमत्र प्रमाणं भजमानं तिष्ठति तद्यथा–

**''तेषां मनुष्यवद्देवताभिधानम्''**

वैदिकमन्त्रवल्लौकिकमन्त्रोऽपि फलवान् भवति। हनुमच्चत्वारिंशी वेदमन्त्रवदद्यतनैः पापठ्यते फलञ्च लभ्यते तथैव तस्य कर्ता तुलसीदासः तस्य रामायणं च फलवद् भवति।

- **इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा। शिक्षाणो अस्मिन् पुरूहूत यामनि जीवा ज्योतिरशीमहि। ऋक् ७/३२/२६**

**विमर्शः – ''त्रि इन्धी दीप्तौ'' ''इदि परमैश्वर्ययोः''** इत्याभ्यां द्वाभ्यां धातुभ्यां व्युत्पन्न इन्द्रशब्दोऽत्र आत्मानं परमात्मानमेव विवक्ति। पाणिनिकृतव्याकरणाष्टाध्यायीसूत्रेष्वन्यतमं सूत्रमिहोपन्यस्येन्द्रस्य अर्थः आत्मैवेति प्रदर्शन्नाह तद्यथा –

**''इन्द्रियमिन्द्रलिंगमिन्द्र''**

इह इन्द्रः आत्मेति भाष्ये स्पष्टमुक्तं भाष्यकारेण। सूक्तमिदं समानं व्यवहारं शिक्षयदाह। पूर्वत्र तु सम्बोधनपदमिन्द्र इति। तदुपरि शिक्षां शिक्षयन्नुच्यते **''यथा पिता पुत्रेभ्यो क्रतुमाभर''** येन प्रकारेण इति यच्छब्दात् **''प्रकारवचने थाल्''** इति थालि सति प्रकारार्थको यथेति अव्ययपदम् । **''पृ पालनपूरणयोरित्यर्थकाद्धातोर्व्युत्पन्नः पितृशब्दः पालयितारं पूरयितारञ्चार्थमाह।''** पिता पुत्रं पालयति सांसारिकानि वस्तूनि चापि प्रपूरन्यतीति को न वेद। पुत्रेभ्यो पुत्रेभ्य इति। **''ना पुत्रस्य गति''**रिति **''अपुत्रस्य गति र्नास्ति''** इत्याभ्यां द्वाभ्यां प्रकाराभ्यामिदमुच्यते। पुत्रपालने तस्य लालने च कृतप्रयत्नाः नराः दरीदृश्यन्ते। येनाग्रिमे काले स हि वंशस्य पितुः मातुः गुरोर्नाम समुज्ज्वलपदे स्थापयेत्। पुत्रनिर्मितिरावश्यकी सैवाग्रिमपंक्त्यां धूर्भूत्वा राष्ट्रं समाजं संरक्षेत्। अतः हिन्द्यामेकोक्ति विश्रुता सा यथा –

**''पुत्र कुपुत्र तो का धन संचय।**

**पुत्र सुपुत्र तो का धन संचय॥''**

संसारे भूमेरुत्पन्नानां समग्राणां वसूनां पुत्रत्वं सिद्धं भवति यथा वेदस्त्वाह –

**''माता भूमिः पुत्रोऽहं पृथिव्याः''**

अन्नानि पुष्पाणि वृक्षाः वनस्पतयः औषधयः भूमेरुत्पन्नाः पुत्रभूता एव। **''अन्नाद् भवन्ति भूतानि''** इति गीतोक्तदिशापि एतद् अवगन्तुं शक्यतमम्। यद् वेदस्त्वाह तदेवान्यशास्त्राणि प्राहुः। गीता तु भगवदुक्ता सर्वत्र प्रमाणं भजमाना दृश्यतेऽतः आचार्या प्रस्थानत्रयीमेव व्याचिख्यासवः सन्तः अवलोक्यन्ते।

मन्त्रे प्रोच्यते यथा पिता पुत्रं पालयति रक्षति, तं संस्करोति परिष्करोति तत्र शौर्यं संस्थापयति प्रोच्चं पदं राजमानः सन् देदीप्यतामिति अभिलषति तथैव देदीप्यमान! परमात्मन्! नः अस्मानपि सत्पथं निर्दिशत्विति। पापिष्ठोऽपि पिता न कांक्षति यन्मदीयात्मजः पापीयान् पापिष्ठोवा भवेत्तथा परमात्मा नैवेदं करोति–

**उमा राम सम को जग माही।**

**गुरु पितु मातु बन्धु प्रभु नाहीं॥**

इदन्तु नरः विभाव्यात्मदोषमपकर्तुमीहमानः सन् प्रार्थयति परमात्मतत्त्वम्। अत्राहंकृतिनिरसन पूर्वकमात्मप्रपन्नागतिरिह प्रदर्श्यते नराणाम्। अहंकारोऽपि मायायाः पुत्रस्तयान्वितो जनः सांसारिकत्वं प्रपद्यमानः दृश्यते। मायाबद्धो हि तस्या निर्मोक्तुं जनः मायास्वामिनं प्रति प्रतिबद्धो भवति तदैव तस्य मुक्तिरिति गीताकारः प्राह –

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**

**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥**

सूक्तिरियमिदमेव भणन्ती जनान् सर्वान् संकेतयति यत्पुत्रनिर्माणवत्संसारनिर्माणं विदध्यात्। पुष्पसुगन्धवत् संसारं निमार्तुं नरः एवमेव विधत्ते तत्र विवेकानन्दः प्रमाणम्। अद्य **"सर्वे गुणाः कांचनमाश्रयन्ति"** इत्युक्तं वाक्यं सर्वत्र नरीनर्ति। अस्य भावं विभाव्यैतद् वक्तुं शक्यं यत् देशः भ्रष्टाचारे लिप्तस्तस्मान्मोचनाय अस्माभिः कृतयत्नैः भवितव्यन्तेन हीनानां दीनानामप्यधिकारः सुरक्षितः स्यात् नो चेद्भारतीयोऽयमृषीणां मन्त्रः मिथ्यात्वं भजेत् –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥**

अस्य पद्यस्य समर्थन एव नीतिकारोक्तं वाक्यमपि वितथं स्यात् –

**"अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥"**

उपरितनद्वयपद्यस्य भावं संसारे स्थापयितुं वेदोक्तां सूक्तिं व्याख्यामुररीकुर्यात्। वेदस्यानूदितमेव वाक्यद्वयमिति प्रदर्शयन्नाह –

**"कृण्वन्तो विश्वमार्यम्"**

युक्तः नरः एव युक्तं संसारं निर्मायात्। युक्ते विश्वस्मिन् सर्वं सुखमयम् आनन्दमयं प्रसन्नमयं स्यात्। यदि सर्वत्र शान्तिस्तेन स्वर्गस्यावतरणमिह पृथिव्यां स्यान्नापरत्र स्वर्गस्य कल्पना कुर्यात्। केवलं ज्ञानन्नाधिकं महत्त्वं भजतेऽपि तु तस्याचरणमेव श्रेयः अतः आह –

**''आचारः परमो धर्मः''**

नीतिकारेण हरिना नीतावेकत्र प्राह –

**दुर्जनः परिहर्तव्यो,**

**विद्ययालंकृतोऽपि सन्।**

**मणिना भूषितः सर्पः,**

**किमसौ न भयंकरः॥**

मणिभूषितोऽपि भुजंगः भयंकरः तथैव विद्यालंकृतोऽपि नरः दुःखदः प्रतिपदम्। मूर्खत्वापवारणाय ज्ञानस्य तस्याचरणस्य च श्रेयस्त्वं सर्वत्र जेगीयते। मूर्खाणां प्रति नैन्द्यं प्रदर्श्य नीतिकारः प्राह –

**''न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्''**

विश्वस्मिन् सर्वत्र मूर्खत्ववारणायं कृतयत्नैः मनुष्यैः बोभूयते तथापि मूर्खत्वमन्धकारवदद्यापि सर्वत्र राराजतेऽतस्तस्य वारणाय सर्वदागामिकालेऽपि अधुनापि यत्नः प्रचलत्येव। प्रसंगेऽस्मिन् मन्त्रोऽयं व्याख्यातः युक्तियुक्तः सन् सत्मार्गं प्रदर्शयेदिति।

दोहा –

**वरु भल वास नरक कर ताता,**

**दुष्ट संग जनु देई विधाता।**

- **एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरित्वानमाहु॥ ऋग्वेद १–१६४–४६**

**विमर्शः –** ऋषेरयमेकेश्वरवादः विश्वमेकसूत्रे बध्नन् अस्मानपि **''एकं सत्''** प्रति जागरयति। **''एकं सत्''** इत्युक्ते ज्ञायते परमात्मा एको भूत्वा सर्वत्र विद्यमानो विराजते। विप्रा बहुधा वदन्ति। ऋषिभिः विप्रैर्वेदज्ञैरयं बहुप्रकारेण जेगीयते। प्रकारे धाप्रत्ययविधानादिह प्रकारेणेति विज्ञेयम्। **''संख्याया विधार्थे धा''** इति सूत्रप्रमाणात्। **''इन्द्रं यमं मातरिश्वानमाहुः''** इत्युक्ते ज्ञेयं यदेकः स देवेन्द्रः यमो मातरिश्वा चेति भण्यते। यद्यपि दशदिग्पालाः, अष्टौ वसवः, द्वादश आदित्या, एकादश रुद्राः कार्यवैभिन्न्यात्पृथक् पृथक् नाम्ना शास्त्रेषु गीयन्ते परं परमार्थतस्त्वेक एव। यथा एको नरः पुत्रः, भ्राता, पिता, पतिरिति पृथक् नाम्ना व्यवह्रियते तथैव परमात्मा सर्वत्र एक एव वरीवर्ति इति आशयः। यदि एकं वयं मन्यामहे

तदा एकेश्वरवादः। यदि एकमेव बहुधा स्वीकुर्महे तदा अनेकेश्वरवादः प्रोच्येत। उभयत्र एकमेव तत्त्वं राजमानं सद्दृश्यते।

अत्रेदानीं ''सत्'' इति तत्त्वं विभाव्यते गीतायां तु सदेव तत्त्वमीश्वरो यथा –

**''ऊँ तत्सदिति ब्रह्मणस्त्रिविधः स्मृतः''**

भागवतस्यादौ व्यासस्य वचनमपीदमेव यथा –

**''सच्चिदानन्दरूपाय**

**विश्वोत्पत्त्यादिहेतवे**

**तापत्रयविनाशाय**

**श्रीकृष्णाय वयं नुमः॥''**

ब्रह्मणः लक्षणं कुर्वन्नाहुः विद्वांसो यथा –

**''सत्यं ज्ञानमनन्तं ब्रह्म''**

यद्यप्यत्र सत्यशब्दस्तथापीदं सत्यं न केवलं सत्यमेवापितु सदेव। अस् धातोः निर्मितं सदिति परमार्थमेवाह। यद्धि शाश्वतिकमविनश्वरं त्रिकालाबाध्यं तत्त्वं तदेव सत्तत्वमिह गीतमिति बोध्यम्। सदात्मकस्य परमात्मनः एकत्वे सिद्धे न क्वापि द्वैष्यमपितु प्रियत्वमेव सर्वत्र सिद्धं स्यात्। **''सदेव सोम्येदमग्र आसीत्''** इत्युपनिषद्वाक्यमपि पूर्वोक्तसमर्थने प्रमाणम्। नासदीयसूक्तेऽमुष्यैव वर्णनं कृतमवलोक्यते। मृत्स्नाहिरण्याभ्यां निर्मितानिसमग्रवस्तूनि पृथक् पृथक् नाम्ना निगद्यन्ते परं पुनः तत्सर्वं मृत् हिरण्यमेव अवशिष्यते तथात्र विज्ञातव्यम्। कठोपनिषदि अस्य बहुकृत्वः वर्णनं मिलति तद्यथा –

**''नेह नानास्ति किञ्चन''**

**''एकविज्ञानेन सर्वविज्ञानवादः''**

एकस्मिन् ज्ञाते सर्वं ज्ञातं भवति एषा बारुणी विद्या ब्रह्मविद्यैव नचिकेतसे ब्रह्मविज्ञां ब्रुवन्नाह यमः मृत्युदेवः सैवेश्वरः सर्वत्रः। नानात्वेन विद्यमानोऽपि सर्वेषु एक एव। अपानापानादिभेदाद्वायुः बहुधा परं परमार्थतः एक एव। शंकरस्यैकेश्वरवादः बहुसिद्धः सर्वत्र विश्वस्मिन् व्याप्तः। अयं हि राष्ट्रं समाजं सूत्रे खलु एकस्मिन् बध्नाति। अद्यास्य वादस्यावश्यकता लक्ष्यते। वादस्यास्य प्रचाराय प्रसारायास्माभिः बहुकृत्वः प्रयतनीयम्। अनेन विश्वमंगलमवश्यंभावीति मामकीनं मतमितिकृत्वा विरमामि।